

LIBRARY
CALCUTTA

STORY OF NALA.

MONIER WILLIAMS.

London:

HENRY FROWDE,



OXFORD UNIVERSITY PRESS WAREHOUSE,

7 PATERNOSTER ROW.

SOLD ALSO BY

W. H. ALLEN AND CO.

WATERLOO PLACE,

Publishers to the India Office.

NALOPÁKHYÁNAM,

STORY OF NALA.

AN EPISODE OF THE MAHÁ-BHÁRATA:

THE SANSKṚIT TEXT,

WITH A COPIOUS VOCABULARY

AND

AN IMPROVED VERSION OF DEAN MILMAN'S TRANSLATION,

BY

MONIER WILLIAMS, M.A., D.C.L.,

HON. LL.D. OF THE UNIVERSITY OF CALCUTTA,
HON. MEMBER OF THE BOMBAY ASIATIC SOCIETY,
BODEN PROFESSOR OF SANSKṚIT IN THE UNIVERSITY OF OXFORD.

SECOND EDITION,
REVISED AND IMPROVED.

Oxford:
AT THE CLARENDON PRESS.
M.DCCC.LXXIX.

PREFACE.

THE Story of Nala, as told in the following pages, is an episode of the Mahá-bhárata, one of the two great Epic poems of the Hindús, containing no less than 107,389 ślokas or stanzas. It is extracted from the sixth chapter (fifty-third section) of the third Book or Vana-parvan. Like the rest of the Mahá-bhárata, its authorship is attributed to Krishṇa-Dvaipáyana, who is called Vyása, because he *arranged* the Vedas [1]. It is not to be supposed, however, that the Vedas and Mahá-bhárata are really the work of the same author. The Vedas are many centuries older than the great Epic poem, and each is the composition of several authors. Probably an interval of several centuries separates the more ancient hymns of the Veda from the more modern; and a similar or perhaps greater separation may be observed between the older parts of the Mahá-bhárata and the more modern interpolations.

By ascribing this work to Vyása—who is also the reputed author of the Vedánta philosophy—it is merely implied that, at some time or other, order and sequence were given to what

[1] *Vivyása vedán yasmát sa tasmád vyása iti smṛitáḥ.* Mahá-bh. I. 2417. He was called *Krishṇa* from his dark complexion, and *Dvaipáyana* because he was brought forth by Satyavatí on an *island* in the Jumná, his father being the Ṛishi Paráśara. *Nyasto* dvípe *sa yad bálas tasmád Dvaipáyanaḥ smṛitaḥ*, line 2416.

was before a mere congeries of distinct compositions by various authors.

Part of the Mahá-bhárata is considered by some[1] to be as old as the fourth century B.C.; but all Hindú chronology is more or less conjectural; and it would be impossible to fix with certainty the date of the composition of any of the principal episodes. The Story of Nala is not part of the main plot of the poem, and probably belongs to a much earlier period of Indian history. The subject of the great Epic is the war between the Kurus or hundred sons of Dhṛita-ráshṭra and their cousins the five sons of Páṇḍu. But about this leading-thread are collected a vast number of ancient legends and traditions, under the weight of which it is often lost, if not altogether broken. In all Oriental books of fables it is common for the principal narrative to be interrupted by a series of stories within stories, loosely connected with the original theme, and often completely overlaying it. So it is with the Mahá-bhárata. The episodes form by far the greater portion of the poem, and generally intervene to break the chain of the narrative, when the incidents are most stirring and the interest is most at its height. The war between the rival princes is doubtless founded on fact; and much valuable matter has been extracted from the narrative by Professor Lassen and other Sanskritists, in elucidation of the early history of India. According to the Vishṇu-Puráṇa, Dhṛita-ráshṭra and Páṇḍu were the sons of the widow of Vićitra-vírya by his half-brother Vyása or Kṛishṇa-Dvaipáyana[2]. This Vićitra-vírya

[1] See my 'Indian Wisdom' (W. H. Allen & Co., London), p. 317.

[2] As Vićitra-vírya (Vyása's half-brother) died without children, the Hindú law, like the Mosaic, permitted Vyása to raise up offspring to his deceased brother. Satyavatí, mother of Vyása, was afterwards wife of Śántanu.

was the son of Śántanu, who was the twenty-third in descent from Kuru, a celebrated prince of the Lunar race, himself the ninth king after Bharata, son of Dushyanta and Śakuntalá, from whom India is to this day called Bhárata-varsha. Vyása is thus reputed to be the actual grandfather of the princes whose quarrels and jealousies are narrated in the poem he is said to have arranged; and, from the genealogy, it is evident that although the sons of Dhṛita-ráshṭra are more usually called the descendants of Kuru, the sons of Páṇḍu were really descended from the same race.

The royal races of India are said to have diverged into two great lines, called Solar and Lunar. The hero of the Solar line, which commenced in Ikshváku, was Ráma-ćandra[1], whose contests with the barbarous tribes of the south of India is described in the Rámáyaṇa, the more ancient of the two great Epics. The Kurus and Páṇḍavas, as equally descendants of Kuru, belonged to the Lunar line, and probably represented different branches of one tribe of Sanskṛit-speaking immigrants, who arrived in India at different times. According to the Mahá-bhárata, Páṇḍu, the father of the five Páṇḍavas, after yielding the succession to his blind brother Dhṛita-ráshṭra, retired to the mountains and died. His five boys were then adopted by Dhṛita-ráshṭra and educated with his own large family of a hundred sons. After escaping many dangers from the malevolence of their cousins, they were ultimately permitted to share with them in the sovereignty. Yudhishṭhira, the eldest of the Páṇḍavas, and his four brothers ruled at Indra-prastha (the modern Delhi), and Duryodhana with his ninety-nine brothers (usually

[1] This Ráma, who is the most celebrated incarnation of Vishṇu, must not be confounded with the two inferior Rámas, Paraśu-Ráma and Bala-Ráma. See my Sanskṛit Dictionary (published at the Clarendon Press) under *Ráma*.

called the Kurus) were sovereigns at the neighbouring town of Hastiná-pura. The Páṇḍavas, whose disposition was as amiable as that of the Kurus was malevolent, seem to have been very successful in subduing the districts contiguous to their own; and, notwithstanding the animosity of their neighbouring cousins, to have attained considerable prosperity. A great misfortune, however, overtakes them. Tempted to amuse themselves with dice, and yielding to a weakness which has ever been a fashionable failing amongst the Hindús, Yudhishṭhira loses all his possessions, at a game of hazard, to his cousin Duryodhana: and, retiring with his brethren into exile, lives for twelve years in the forest (vana). It is to console them under their affliction that the sage Vṛihadaśva relates to king Yudhishṭhira the Story of Nala, who, himself a virtuous monarch, lost his kingdom also through his passion for dice; but after suffering great hardships again recovered it.

The following short summary of the Story of Nala may be useful as an introduction to the study of the poem.

Nala, who is described as 'gifted with choicest virtues,' and is especially noted for his skill in driving, has only one fault, the inherent love of gambling[1]. He was king of Nishadha, a country in central India, in the S. E. division, whence his other name of Naishadha. In a neighbouring country, called Vidarbha (the modern Berár), reigned Bhíma, whose only daughter, Damayantí, was so beautiful that her fame reached the ears of Nala. His interest in her being excited, was fanned into a flame by the following incident:—

Walking in his garden one day, and seeing some swans

[1] The epithet *aksha-priya*, 'fond of dice,' is applied to Nala in enumerating his good qualities (verse 3), and Kali, therefore, only assailed him in his weak point. See, however, the vocabulary under *aksha-priya*.

disporting themselves near him, the fancy takes him to catch one out of sport. The bird, addressing him in human language, promises, if he will release it, to fly to Damayantí and praise Nala in her presence. This plan being agreed upon and carried into effect, Damayantí becomes duly inspired with a passion for Nala. Bhíma, her father, seeing his daughter pining in secret, determines to celebrate her Svayaṃvara, that is, to proclaim the public choice of a husband by Damayantí, according to the custom of that age. All the princes of India, including Nala, flock to Vidarbha, as suitors for the hand of Damayantí. The gods also, hearing of her beauty, resolve to be present; and, meeting Nala on their road to the Svayaṃvara, commission him to plead their cause with Damayantí. He confesses himself enamoured also, and entreats to be excused; but being adjured sternly, promises to deliver their message, and is introduced by them unseen into the palace. There he has an interview with Damayantí, who, slighting the message of the gods, confesses her love to Nala, and her intention to choose him and him only. Accordingly, at the Svayaṃvara, in spite of the artifice of the deities who assume Nala's shape, she detects her lover by his shadow, (the gods having none,) and selects him. It appears that at the time of the Svayaṃvara, Kali, an evil genius, the fourth Age of the world or Vice personified, had set out for Vidarbha with the intention of making Damayantí his consort; but, hearing of the completion of the marriage-ceremony, he resolves out of jealousy to work the ruin of Nala. For twelve years he watches his opportunity, and at last, detecting Nala in some trifling neglect of his ablutions, enters and acquires power over his body. Infatuating his victim, he instigates him to play at dice with his brother Pushkara. The game goes on for many months; and Nala,

after losing his kingdom and all his possessions, is driven with Damayantí into exile. In the forest, Nala, still infatuated by Kali, deserts Damayantí; who, wandering alone, and escaping many perils, at last finds a refuge at the court of the king of Ćedi. Meanwhile, Nala, passing through the forest, rescues a serpent from a flaming bush. This serpent turns out to be Karkoṭaka, one of the principal Nágas (see vocabulary under नाग) or semi-divine beings inhabiting the regions under the earth. In return for the service rendered by Nala, Karkoṭaka promises to deliver Nala from the power of Kali. He accordingly metamorphoses Nala into a dwarfish charioteer, but gives him a magic garment, by assuming which he can at any time regain his proper form. Nala, now transformed to the short-armed Váhuka, enters the service of Ṛituparṇa, king of Ayodhyá, a monarch celebrated for his skill in dice. Meanwhile, king Bhíma, searching the world for his lost daughter, discovers her at length at Ćedi, and sends for her thence to his own capital. There, pining for the lost Nala, she devises a plan to recover him. Suspecting that he is living, disguised as Váhuka, with Ṛituparṇa, king of Ayodhyá, she causes the latter to be told that king Bhíma would celebrate on the morrow a second Svayaṃvara for his daughter Damayantí. Ṛituparṇa determines to be present, but can only be so by the help of his charioteer Váhuka, whose skill in horsemanship enables him to drive from Ayodhyá to Vidarbha in one day. On the road Nala, disguised as Váhuka, agrees to impart to Ṛituparṇa his knowledge of horsemanship in return for that monarch's skill in dice. They make the exchange, and, arriving at Ayodhyá, Nala re-assumes his own form and is restored to his wife. Returning with her to Nishadha, he seeks Pushkara, renews the game, and wins back his kingdom. Then, with noble generosity, he

forgives Pushkara, and enters on a long and happy reign with his consort Damayantí.

That this Story of Nala, however comparatively modern the version in the Mahá-bhárata, is of great antiquity, may be proved by internal evidence. The prominence given to the deities Indra, Agni, Varuṇa, and Yama, and the absence of all allusion to the great Hindú Triad, connect the narrative more with the Vedic than the Epic and Puránic periods[1]. If Nala was of the Solar race, as represented by Kálidása, he must have been the fourth from the great Ráma, son of Daśa-ratha, the genealogy, according to the Raghu-vanśa, running thus:—Raghu, Aja, Daśa-ratha, Ráma, Kuśa, Atithi, Nishadha, Nala, Nabhas. But if he belonged to the Lunar dynasty, reigning at Nishadha, when Ṛituparṇa of the Solar race reigned at Ayodhyá, then we must assign him a much earlier date, and place him fourteen reigns before Ráma.

The story, no doubt, rests on a foundation of fact, and, on account of its age, is a favourite subject with Hindú poets. It not only appears as an episode to the Mahá-bhárata, but forms the subject of two other celebrated poems, one called the Nalodaya, attributed to the great Kálidása, the author of Śakuntalá; and the other called the Naishadha, written by Śrí Harsha. It is also introduced by Somadeva Bhaṭṭa into his collection of stories called Kathá-sarit-ságara, and told there with variations. It is, moreover, the subject-matter of a very curious composition, half prose, half verse, called Ćampú,

[1] *According to Professor Brockhaus, the personification of Kali as the demon of the fourth Age, and not of the dice, shews that the modern arranger of the story did not understand this old Vedic term, and is another proof of the earlier existence of the Nala. The word Tretá (which denotes the second Age of the world) is also used for a throw of dice. See the second Act of the Mṛićchakaṭi.*

by an author named Tri-vikrama, and of a well-known work in Tamil, called the Nala-Rájá, and again of another in Telugu, by the poet Rághava, written about A. D. 1650; these latter poems being independent compositions, and not mere translations from the Sanskṛit.

It is a noteworthy circumstance in the history of Indian literature, that the later Hindú poets, with much exuberance of fancy, displayed little originality in their conceptions. Whether they thought it a sacred duty to follow in the beaten track, or whether their inventive faculties were feeble, it rarely enters into their heads to devise a new story for themselves. They content themselves with the regular stock materials, and exercise their ingenuity either in diluting them or serving them up in a concentrated form, with here and there a few embellishments or additions of their own. The two Epic poems are their grand repertories. These gigantic compositions, like vast national banks with inexhaustible resources, are drawn upon freely by every poet. The history of Ráma, which is narrated at full length in the Rámáyaṇa, is condensed into moderate dimensions by Kálidása in his Raghu-vanśa, reduced to a mere table of contents by Bhaṭṭi in his grammatical poem, and represented with dramatic richness of detail by Bhava-bhúti in his well-known play, the Uttara-Ráma-ćaritra. Then we have a celebrated poet Mágha, writing his epic on a story taken from the seventh chapter of the second Book or Sabhá-parva of the Mahábhárata (the destruction of Śiśupála, king of Ćedi, by Kṛishṇa); and the poet Bháravi, the author of another well-known Epic called Kirátárjuníya (or the contest of Arjuna with Śiva as a mountaineer), selecting his subject from the fourth chapter of the third Book or Vana-parva of the same great poem. One advantage of this is, that if we have not

a variety of subjects, we have at least a diversity of styles. The same subject could not be treated by every author in the same way. We have, therefore, specimens of every shade of composition between the most tedious diffuseness and the most laconic curtness,—the most turgid ornament and the most severe simplicity. In no other language but the ductile, flexible, and infinitely copious Sanskṛit could such opposite extremes be possible. The very same idea which by one author is expressed with a brevity unapproachable in English, is by another expanded and beaten out till the substance of the original metal almost disappears. In the one case we have every needless word rejected, and the meaning so obscured, that sentences have to be interpreted like oracles, and every line of text to be illustrated by pages of commentary; in the other, huge compounds are introduced, epithets heaped on epithets, metaphors on metaphors, till the mind of the venturesome reader is hopelessly bewildered. This is what has happened to the Story of Nala. Presented to us in the plainest manner in the Mahá-bhárata, it is condensed in the Nalodaya with a compression and concentration absolutely painful; in the Naishadha it is diluted by prolix descriptions or overdone with rich imagery; in Somadeva's Kathá-sarit-ságara it is again exhibited in its simple form; whilst in Tri-vikrama's Ćampú it is buried under a dead weight of long words, ponderous compounds, and inflated periods.

The main features of the present edition of the Mahá-bhárata version of the Nala will be patent at once.

In the first place, it presents, as far as possible, a pure and accurate text. Excellent MSS. of the Mahá-bhárata, belonging to the India Office and Bodleian Libraries, have been at my command, and the text of the following pages

is the result of a careful collation of these with the various printed editions already before the public.

With regard to the vocabulary appended to this work, I have only to say that I have spared no pains to make it more complete than that of the first edition, and to bring it into harmony with the fourth edition of my Sanskṛit Grammar, also published by the Delegates of the Clarendon Press. The amount of labour entailed by a glossary of this kind is only to be appreciated by those who have themselves undergone it. I believe this to be the only vocabulary in which each word, as it stands in the text, whatever be its form, either of case or tense, or whatever the change in that form resulting from the rules of euphony, occupies its proper alphabetical place. Those who have had experience in teaching will understand the value of this aid to students just beginning to read a language abounding in intricate combinations and perplexing euphonic changes. There cannot be a greater mistake than to suppose that the amount of assistance required in a Sanskṛit vocabulary is to be measured by that given in Greek or Latin glossaries. We have in Sanskṛit two peculiarities. One is the constant use of long compound words; the other is the habit of joining words together by a strict system of euphony, which, though not carried to the same extreme in all printed books, must always be a source of perplexity. The learner has to make repeated references to his vocabulary, and every facility should be accorded to him. I have known pupils, who have worked their way steadily through the grammar, puzzle themselves hopelessly over the following three words in the first story of the Hitopadeśa, *visarpan tán taṇḍulakaṇán*, because, in accordance with euphonic laws, these words are printed in the text thus,—*visarpanstánstaṇḍulakaṇán* (विसर्प-

स्तांस्तण्डुलकणान्), while the original words, in their unchanged form, are exhibited in the glossary. If the words were divided, the difficulty would not be insurmountable: but not finding विसर्पंस्, the student concludes that he has mistaken the division. Referring again to the vocabulary, he finds वि and सर्पै, and taking these for his first words goes entirely wrong. Now according to my method, as before explained, the words would be separated in the text thus, —*visarpans táns taṇḍulakaṇán;* and they would moreover be so exhibited in their proper places in the glossary, an explication of the euphonic changes being added. In all cases where separation is undesirable, as when two vowels blend into one, or when a final *i* or *u* has been changed to *y* or *v*, the whole combination is given, and the division of the words indicated.

I believe the present vocabulary will be found to contain every word in the text. If each separate article is not always as full of details as might be expected, it should be borne in mind that the perfection of a special work of this kind consists in its not being burdened with more words and meanings than are wanted for the one book which it elucidates. Moreover, the grammar is intended to go hand in hand with the vocabulary, and a complete explanation of a difficulty is often to be sought in the rules to which constant reference is made.

With regard to the metrical translation which accompanies this edition of the Nala, the late Dean Milman, shortly before his death, kindly adopted many of my suggestions for the improvement of his original version, so as to adapt it more closely to the text. Its continued use has revealed the need of further slight alterations, which I have been obliged to make on my own responsibility.

The metre of the Sanskrit text never varies from the regular śloka measure called Anushṭubh, an account of which, with a table of all the most common varieties of metre, is given at the end of the fourth edition of my Sanskrit Grammar, published at the Clarendon Press. It consists of sixteen syllables to the half-line or thirty-two to each verse of two lines.

The first line of the poem serves as a model for the whole, and with the exception of the six syllables, whose quantities are here marked by the usual prosodial marks (⏑ – – || ⏑ – ⏑), the poet is allowed the option of either long or short:

ásíd rájá nălō nāma || vírasenasŭtō bălí.

Occasionally the 6th and 7th syllables are short instead of long.

M. W.

OXFORD, June 1879.

॥ नलोपाख्यानम् ॥

STORY OF NALA.

॥ नलोपाख्यानम् ॥

वृहदश्व उवाच ।

आसीद् राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैर् इष्टै रूपवान् अश्वकोविदः ॥१॥
अतिष्ठद् मनुजेन्द्राणां मूर्ध्नि देवपतिर् इव ।
उपर्युपरि सर्वेषाम् आदित्य इव तेजसा ॥२॥
ब्रह्मण्यो वेदविच् छूरो निषधेषु महीपतिः ।
अक्षप्रियः सत्यवादी महान् अक्षौहिणीपतिः ॥३॥
ईप्सितो वरनारीणाम् उदारः संयतेन्द्रियः ।
रक्षिता धन्विनां श्रेष्ठः साक्षाद् इव मनुः स्वयं ॥४॥
तथैवासीद् विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर् युक्तः प्रजाकामः स चाप्रजः ॥५॥
स प्रजार्थे परं यत्नम् अकरोत् सुसमाहितः ।
तम् अभ्यगच्छद् ब्रह्मर्षिर् दमनो नाम भारत ॥६॥
तं स भीमः प्रजाकामस् तोषयामास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसं ॥७॥
तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीन् उदारान् महायशाः ॥८॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसं ।
उपपन्नान् गुणैः सर्वैर् भीमान् भीमपराक्रमान् ॥९॥

STORY OF NALA.

VṚIHADAŚVA spake:

LIVED of yore, a Rája, Nala, Vírasena's mighty son,
Gifted he with choicest virtues, beauteous, skilled in taming steeds:
Head of all the kings of mortals, like the monarch of the gods,
Over, over all exalted, in his splendour like the sun:
Holy, deep-read in the Vedas, in Nishadha lord of earth;
Loving dice, of truth unblemished, chieftain of a mighty host;
The admired of noble women, generous, with each sense subdued;
Guardian of the state; of archers best, a present Manu he.

So there dwelt in high Vidarbha, Bhíma, terrible in strength,
With all virtues blest, but childless, long for children had he pined.
Many an holy act, on offspring still intent, had he performed.
To his court there came a Bráhman, Damana the seer was named.
Him the child-desiring Bhíma, in all duties skilled, received,
Feasted with his royal consort, in his hospitable hall.
Pleased on him the grateful Daman, and his queen a boon bestowed,
One sweet girl, the pearl of maidens, and three fair and noble sons.
Damayantí, Dama, Dánta, and illustrious Damana,
Richly gifted with all virtues, mighty, fearful in their might.

दमयन्ती तु रूपेण तेजसा यशसा श्रिया।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥१०॥
अथ तां वयसि प्राप्ते दासीनां समलंकृतं।
शतं,शतं सखीनाञ्च पर्युपासच् छचीम् इव ॥११॥
तत्र स्म राजते भैमी सर्वाभरणभूषिता।
सखीमध्येऽनवद्याङ्गी विद्युत् सौदामिनी यथा ॥१२॥
अतीव रूपसम्पन्ना श्रीर् इवायतलोचना।
न देवेषु न यक्षेषु तादृग् रूपवती क्वचित् ॥१३॥
मानुषेष्वपि चान्येषु दृष्टपूर्वाथवा श्रुता।
चित्तप्रमाथिनी बाला देवानाम् अपि सुन्दरी ॥१४॥
नलश्च नरशार्दूलो लोकेष्वप्रतिमो भुवि।
कन्दर्प इव रूपेण मूर्तिमान् अभवत् स्वयं ॥१५॥
तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात्।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥१६॥
तयोर् अदृष्टकामोऽभूत् शृण्वतोः सततं गुणान्।
अन्योन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः ॥१७॥
अशक्नुवन् नलः कामं तदा धारयितुं हृदा।
अन्तःपुरसमीपस्थे वन आस्ते रहो गतः ॥१८॥
स ददर्श ततो हंसान् जातरूपपरिष्कृतान्।
वने विचरतां तेषाम् एकं जग्राह पक्षिणं ॥१९॥
ततोऽन्तरीक्षगो वाचं व्याजहार नलं तदा।
हन्तव्योऽस्मि न ते राजन् करिष्यामि तव प्रियं ॥२०॥
दमयन्तीसकाशे त्वां कथयिष्यामि नैषध।
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित् ॥२१॥
एवम् उक्तस् ततो हंसम् उत्ससर्ज महीपतिः।
ते तु हंसाः समुत्पत्य विदर्भान् अगमंस् ततः ॥२२॥

Damayantí with her beauty, with her brilliance, brightness, grace,
Through the worlds unrivalled glory won the slender-waisted maid.
Her, arrived at bloom of beauty, sat a hundred slaves around,
And a hundred virgin handmaids, as around great Indra's queen.
In her court shone Bhíma's daughter, decked with every ornament,
'Mid her handmaids, like the lightning, shone she with her faultless form;
Like the long-eyed queen of beauty, without rival, without peer.
Never 'mid the gods immortal, never 'mid the Yaksha race,
Nor 'mong men was maid so lovely, ever heard of, ever seen,
As the soul-disturbing maiden, that disturbed the souls of gods.
Nala too, 'mong kings the tiger, peerless among earthly men,
Like Kandarpa in his beauty, like that bright-embodied god.
All around Vidarbha's princess, praised they Nala in their joy;
Ever praised they Damayantí, round Nishadha's noble king.
Hearing so each other's virtues, all unseen they 'gan to love.
Thus of each, O son of Kunti, the deep silent passion grew.

Nala, in his heart impatient, longer that deep love to bear,
To the grove, in secret, wandered, by the palace' inmost court.
There the swans he saw disporting, with their wings bedropped with gold:
Through the grove thus lightly moving one of these bright birds he caught.
But the bird, in human language, thus the wondering king addressed:
'Slay me not, O gentle monarch! I will do thee service true;
So in Damayantí's presence will I praise Nishadha's king,
Never after shall the maiden think of mortal man but thee.'

Thus addressed, at once the monarch let the bright-winged bird depart.
Flew away the swans rejoicing, to Vidarbha straight they flew;

विदर्भनगरीं गत्वा दमयन्त्यास् तदान्तिके।
निपेतुस् ते गरुत्मन्तः सा ददर्श च तान् गणान् ॥२३॥
सा तान् अद्भुतरूपान् वै दृष्ट्वा सखीगणावृता।
हृष्टा ग्रहीतुं खगमांस् त्वरमाणोपचक्रमे ॥२४॥
अथ हंसा विससृपुः सर्वतः प्रमदावने।
एकैकशस् तदा कन्यास् तान् हंसान् समुपाद्रवन् ॥२५॥
दमयन्ती तु यं हंसं समुपाधावद् अन्तिके।
स मानुषीं गिरं कृत्वा दमयन्तीम् अथाब्रवीत् ॥२६॥
दमयन्ति नलो नाम निषधेषु महीपतिः।
अश्विनोः सदृशो रूपे न समास् तस्य मानुषाः ॥२७॥
तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि।
सफलं ते भवेज् जन्म रूपं चेदं सुमध्यमे ॥२८॥
वयं हि देवगन्धर्वमानुषोरगराक्षसान्।
दृष्टवन्तो न चास्माभिर् दृष्टपूर्वस् तथाविधः ॥२९॥
त्वञ्चापि रत्नं नारीणां नरेषु च नलो वरः।
विशिष्टाया विशिष्टेन सङ्गमो गुणवान् भवेत् ॥३०॥
एवम् उक्ता तु हंसेन दमयन्ती विशाम्पते।
अब्रवीत् तत्र तं हंसं त्वमप्येवं नले वद ॥३१॥
तथेत्युक्त्वाण्डजः कन्यां विदर्भस्य विशाम्पते।
पुनर् आगम्य निषधान् नले सर्वं न्यवेदयत् ॥३२॥

॥ इति नलोपाख्याने प्रथमः सर्गः ॥१॥

To Vidarbha's stately city: there by Damayantí's feet,
Down with drooping plumes they settled, and she gazed upon the flock,
Wondering at their forms so graceful, where amid her maids she sat.
Sportively began the damsels all around to chase the birds;
Scattering flew the swans before them, all about the lovely grove.
Lightly ran the nimble maidens, every one her bird pursued;
But the swan that through the forest gentle Damayantí chased,
Suddenly, in human language, spake to Damayantí thus:—
'Damayantí, in Nishadha Nala dwells, the noble king;
Like the Asvinas in beauty, peerless among men is he.
O incomparable princess, to this hero wert thou wed,
Noble birth and perfect beauty not unworthy fruit had borne.
Gods, Gandharvas, men, the Serpents, and the Rákshasas we've seen;
All we've seen—of noble Nala never have we seen the peer.
Pearl art thou among all women, Nala is the pride of men.
If the peerless wed the peerless, blessed must the union be.'
When the bird thus strangely speaking gentle Damayantí heard,
Answered thus the wondering maiden, 'Thus to Nala, speak thou too.'
'Be it so,' replied the egg-born to Vidarbha's beauteous maid.
Home then flew he to Nishadha, and to Nala told it all.

END OF BOOK I.

बृहदश्व उवाच ।

दमयन्ती तु तच् छ्रुत्वा वचो हंसस्य भारत ।
ततः प्रभृति न स्वस्था नलं प्रति बभूव सा ॥१॥
ततश् चिन्तापरा दीना विवर्णवदना कृशा ।
बभूव दमयन्ती तु निःश्वासपरमा तदा ॥२॥
ऊर्ध्वदृष्टिर् ध्यानपरा बभूवोन्मत्तदर्शना ।
पाण्डुवर्णा क्षणेनाथ हृच्छयाविष्टचेतना ॥३॥
न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ।
न नक्तं न दिवा शेते हा हेति रुदती पुनः ॥४॥
ताम् अस्वस्थां तदाकारां सख्यस् ता जज्ञुर् इङ्गितैः ।
ततो विदर्भपतये दमयन्त्याः सखीजनः ॥५॥
न्यवेदयत् ताम् अस्वस्थां दमयन्तीं नरेश्वरे ।
तच् छ्रुत्वा नृपतिर् भीमो दमयन्तीसखीगणात् ॥६॥
चिन्तयामास तत् कार्यं सुमहत् स्वां सुतां प्रति ।
किम् इयं दुहिता मेऽद्य नातिस्वस्थेव लक्ष्यते ॥७॥
स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनां ।
अपश्यद् आत्मना कार्यं दमयन्त्याः स्वयंवरं ॥८॥
स संनिमन्त्रयामास महीपालान् विशाम्पतिः ।
अनुभूयताम् अयं वीराः स्वयंवर इति प्रभो ॥९॥
श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरं ।
अभिजग्मुस् ततो भीमं राजानो भीमशासनात् ॥१०॥
हस्त्यश्वरथघोषेण पूरयन्तो वसुन्धरां ।
विचित्रमाल्याभरणैर् बलैर् दृश्यैः स्वलंकृतैः ॥११॥

Vṛihadaśva spake:

Damayantí, ever after she the swan's sweet speech had heard,
With herself she dwelt no longer, all herself with Nala dwelt.
Lost in thought she sat dejected, pale her melancholy cheek,
Damayantí sat and yielded all her soul to sighs of grief.
Upward gazing, meditative, with a wild distracted look,
Wan was all her soft complexion, and with passion heart-possessed,
Nor in sleep nor gentle converse, nor in banquets found she joy;
Night nor day she could not slumber, Woe! oh woe! she wept and said.
Her no longer her own mistress, from her looks, her gesture, knew
Damayantí's virgin handmaids, to Vidarbha's monarch they
Told how pined his gentle daughter for the sovereign of men.
This from Damayantí's maidens when the royal Bhíma heard,
In his mind he gravely pondered for his child what best were done.
'Wherefore is my gentle daughter from herself in mind estranged?'
When the lord of earth his daughter saw in blooming youth mature,
Knew he for the Svayaṃvara Damayantí's time was come.
Straight the lord of many peasants summoned all the chiefs of earth,
'Come ye to the Svayaṃvara all ye heroes of the world!'
Damayantí's Svayaṃvara, soon as heard the kings of men,
All obeyed king Bhíma's summons, all to Bhíma's court drew near;
Elephants, and steeds, and chariots, swarmed along the sounding land;
All with rich and various garlands, with his stately army each,

तेषां भीमो महाबाहुः पार्थिवानां महात्मनां ।
यथार्हम् अकरोत् पूजां तेऽवसंस् तत्र पूजिताः ॥१२॥
एतस्मिन् एव काले तु सुराणाम् ऋषिसत्तमौ ।
अटमानौ महात्मानाव् इन्द्रलोकम् इतो गतौ ॥१३॥
नारदः पर्वतश्चैव महाप्राज्ञौ महाव्रतौ ।
देवराजस्य भवनं विविशाते सुपूजितौ ॥१४॥
ताव् अर्चयित्वा मघवा ततः कुशलम् अव्ययं ।
पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥१५॥

नारद उवाच ।

आवयोः कुशलं देव सर्वत्र गतम् ईश्वर ।
लोके च मघवन् कृत्स्ने नृपाः कुशलिनो विभो ॥१६॥

बृहदश्व उवाच ।

नारदस्य वचः श्रुत्वा पप्रच्छ बलवृत्रहा ।
धर्मज्ञाः पृथिवीपालास् त्यक्तजीवितयोधिनः ॥१७॥
शस्त्रेण निधनं काले ये गच्छन्त्यपराङ्मुखाः ।
अयं लोकोऽक्षयस् तेषां यथैव मम कामधुक् ॥१८॥
क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तान् अहं ।
आगच्छतो महीपालान् दयितान् अतिथीन् मम ॥१९॥
एवम् उक्तस्तु शक्रेण नारदः प्रत्यभाषत ।

नारद उवाच ।

शृणु मे मघवन् येन न दृश्यन्ते महीक्षितः ॥२०॥
विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता ।
रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥२१॥
तस्याः स्वयंवरः शक्र भविता नचिराद् इव ।
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥२२॥

All the lofty-minded Rájas, Bhíma with the arm of strength,
As beseemed, received with honour, on their thrones of state they sat.
At this very hour the wisest of the sages, the divine,
Moving in their might ascended up from earth to Indra's world,
Great in holiness and wisdom, Nárada and Parvata,
Honoured entered they the palace of the monarch of the gods.
Them salutes the cloud-compeller, of their everlasting weal—
Of their weal the worlds pervading, courteous asks the immortal lord.

Nárada spake:

Well it fares with us, Immortal, in our weal the world partakes;
In the world, O cloud-compeller, well it fares with all her kings.

Vṛihadaśva spake:

He that Bali slew and Vṛitra asked of Nárada again,
'All earth's just and righteous rulers, reckless of their lives in fight,
Who the shaft's descending death-blow meet with unaverted eye,
Theirs this everlasting kingdom, even as Kámadhuk is mine.
Where are they, the Kshatriya heroes? wherefore see I not approach
All the earth's majestic guardians, all mine ever-honoured guests?'
Thus addressed by holy Śakra, Nárada replied and said:

Nárada spake:

Hear me now, O cloud-compeller, why earth's kings appear not here.
Of Vidarbha's king the daughter Damayantí, the renowned—
Through the earth the loveliest women in her beauty she transcends—
Soon she holds her Svayamvara, soon her lord the maid will choose.
Thither all the kings are hastening, thither all the sons of kings.

तां रत्नभूतां लोकस्य प्रार्थयन्तो महीक्षितः ।
काङ्क्षन्ति स्म विशेषेण बलवृत्रनिषूदन ॥२३॥
एतस्मिन् कथ्यमाने तु लोकपालाश्च साग्निकाः ।
आजग्मुर् देवराजस्य समीपम् अमरोत्तमाः ॥२४॥
ततस् ते शुश्रुवुः सर्वे नारदस्य वचो महत् ।
श्रुत्वैव चाब्रुवन् हृष्टा गच्छामो वयम् अप्युत ॥२५॥
ततः सर्वे महाराज सगणाः सहवाहनाः ।
विदर्भान् अभिजग्मुस् ते यतः सर्वे महीक्षितः ॥२६॥
नलोऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमं ।
अभ्यगच्छद् अदीनात्मा दमयन्तीम् अनुव्रतः ॥२७॥
अथ देवाः पथि नलं ददृशुर् भूतले स्थितं ।
साक्षाद् इव स्थितं मूर्त्या मन्मथं रूपसम्पदा ॥२८॥
तं दृष्ट्वा लोकपालास् ते भ्राजमानं यथा रविं ।
तस्थुर् विगतसङ्कल्पा विस्मिता रूपसम्पदा ॥२९॥
ततोऽन्तरीक्षे विष्टभ्य विमानानि दिवौकसः ।
अब्रुवन् नैषधं राजन् अवतीर्य नभस्तलात् ॥३०॥
भो भो नैषध राजेन्द्र नल सत्यव्रतो भवान् ।
अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ॥३१॥

॥ इति नलोपाख्याने द्वितीयः सर्गः ॥२॥

Suitors for her hand the Rájas, her of all the world the pearl,
O thou mighty giant-slayer! one and all approach to woo.

As he spake, the world-protectors with the god of fire drew near;
Of the immortals all, the highest stood before the king of gods.
As they all stood silent hearing Nárada's majestic speech,
All exclaimed in sudden rapture, 'Thither we likewise will go;
All the immortals on the instant, with their chariots, with their hosts,
Hastened down towards Vidarbha, where the lords of earth were met.

Nala, too, no sooner heard he of that concourse of the kings,
Set he forth, with soul all sanguine, full of Damayantí's love.

Saw the gods, king Nala standing on the surface of the earth;
Standing in transcendent beauty, equal to the god of love.
Him beheld the world's high guardians, in his radiance like the sun;
Each arrested stood and silent, at his peerless form amazed.
All their chariots the celestials in the midway air have checked,
Through the blue air then descending, they Nishadha's king address:
Ho! what, ho! Nishadha's monarch, Nala, king, for truth renowned;
Do our bidding, bear our message, O, most excellent of men!'

End of Book II.

वृहदश्व उवाच ।

तेभ्यः प्रतिज्ञाय नलः करिष्य इति भारत ।
अथैतान् परिपप्रच्छ कृताञ्जलिर् उपस्थितः ॥ १ ॥
के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ।
किञ्च तद् वो मया कार्यं कथयध्वं यथातथं ॥ २ ॥
एवम् उक्ते नैषधेन मघवान् अभ्यभाषत ।
अमरान् वै निबोधास्मान् दमयन्त्यर्थम् आगतान् ॥ ३ ॥
अहम् इन्द्रोऽयम् अग्निश्च तथैवायम् अपाम्पतिः ।
शरीरान्तकरो नृणां यमोऽयम् अपि पार्थिव ॥ ४ ॥
त्वं वै समागतान् अस्मान् दमयन्त्यै निवेदय ।
लोकपाला महेन्द्राद्याः सभां यान्ति दिदृक्षवः ॥ ५ ॥
प्राप्तुम् इच्छन्ति देवास् त्वां शक्रोऽग्निर् वरुणो यमः ।
तेषाम् अन्यतमं देवं पतित्वे वरयस्व ह ॥ ६ ॥
एवम् उक्तः स शक्रेण नलः प्राञ्जलिर् अब्रवीत् ।
एकार्थसमुपेतं मां न प्रेषयितुम् अर्हथ ॥ ७ ॥
कथं तु जातसङ्कल्पः स्त्रियम् उत्सहते पुमान् ।
परार्थम् ईदृशं वक्तुं तत् क्षमन्तु महेश्वराः ॥ ८ ॥

देवा ऊचुः ।

करिष्य इति संश्रुत्य पूर्वम् अस्मासु नैषध ।
न करिष्यसि कस्मात् त्वं व्रज नैषध माचिरं ॥ ९ ॥

वृहदश्व उवाच ।

एवम् उक्तः स देवैस् तैर् नैषधः पुनर् अब्रवीत् ।
सुरक्षितानि वेश्मानि प्रवेष्टुं कथम् उत्सहे ॥ १० ॥

Vṛihadaśva spake:

Nala made his solemn promise, 'All your bidding will I do;'
Then with folded hands adoring humbly of their will enquired.
'Who are ye? to whom must Nala as your welcome herald go?
What is my commanded service? tell me, mighty gods, the truth.'
Spake the sovereign of Nishadha, Indra answered thus and said:—
'Know us, the Immortals, hither come for Damayantí's love,
Indra I, and yon is Agni, and the king of waters there—
Slayer he of mortal bodies, Yama, too, is here, O king!
Thou, O Nala, of our coming must to Damayantí tell:
Thee to see, the world's dread guardians, Indra and the rest came down,
Indra, Agni, Varun, Yama, each to seek thine hand are come.
One of these celestial beings choose, O maiden, for thy lord.'
Nala, thus addressed by Indra, with his folded hands replied:
'Thus, with one accord commanding, on this mission send not me.
How can man, himself enamoured, for another plead his cause?
Spare me then, ye gods, in mercy, this unwelcome service, spare.'

The Gods spake:

'I will do your bidding freely,' thus thou'st said, Nishadha's king;
Wilt thou now belie thy promise? Nala, go, nor more delay.

Vṛihadaśva spake:

By the gods adjured so sternly, thus rejoined Nishadha's king:—
'Strictly guarded is yon palace, how may I find entrance there?'

प्रवेक्ष्यसीति तं शक्रः पुनर् एवाभ्यभाषत ।
स जगाम तथेत्युक्त्वा दमयन्त्या निवेशनं ॥११॥
ददर्श तत्र वैदर्भीं सखीगणसमावृतां ।
देदीप्यमानां वपुषा श्रिया च वरवर्णिनीं ॥१२॥
अतीव सुकुमाराङ्गीं तनुमध्यां सुलोचनां ।
आक्षिपन्तीम् इव प्रभां शशिनः स्वेन तेजसा ॥१३॥
तस्य दृष्ट्वैव ववृधे कामस् तां चारुहासिनीं ।
सत्यं चिकीर्षमाणस्तु धारयामास हृच्छयं ॥१४॥
ततस् ता नैषधं दृष्ट्वा सम्भ्रान्ताः परमाङ्गनाः ।
आसनेभ्यः समुत्पेतुस् तेजसा तस्य धर्षिताः ॥१५॥
प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः ।
न चैनम् अभ्यभाषन्त मनोभिस् त्वभ्यपूजयन् ॥१६॥
अहो रूपम् अहो कान्तिर् अहो धैर्यं महात्मनः ।
कोऽयं देवोऽथवा यक्षो गन्धर्वो वा भविष्यति ॥१७॥
न तास् तं शक्नुवन्ति स्म व्याहर्तुम् अपि किञ्चन ।
तेजसा धर्षितास् तस्य लज्जावत्यो वराङ्गनाः ॥१८॥
अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी ।
दमयन्ती नलं वीरम् अभ्यभाषत विस्मिता ॥१९॥
कस् त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन ।
प्राप्तोऽस्यमरवद् वीर ज्ञातुम् इच्छामि तेऽनघ ॥२०॥
कथम् आगमनं चेह कथं चासि न लक्षितः ।
सुरक्षितं हि मे वेश्म राजा चैवोग्रशासनः ॥२१॥
एवम् उक्तस्तु वैदर्भ्या नलस् तां प्रत्युवाच ह ।

नल उवाच ।

नलं मां विद्धि कल्याणि देवदूतम् इहागतं ॥२२॥
देवास् त्वां प्राप्तुम् इच्छन्ति शक्रोऽग्निर् वरुणो यमः ।

'Thou shalt enter;' thus did Indra to the unwilling king reply.
In the bower of Damayantí, as they spake, king Nala stood.
There he saw Vidarbha's maiden, girt with all her virgin bands;
In her glowing beauty shining, all excelling in her form;
Every limb in smooth proportion, slender waist and lovely eyes;
E'en the moon's soft gleam disdaining in her own o'erpowering light.
As he gazed, his love grew warmer to the softly smiling maid,
Yet to keep his truth, his duty, all his passion he suppressed.
Then Nishadha's king beholding, all those maids with beauteous limbs
From their seats sprang up in wonder, at his matchless form amazed.
In their rapture to king Nala, all admiring, homage paid;
Yet, not venturing to accost him, in their secret souls adored.
'Oh the beauty! oh the splendour! oh the mighty hero's strength!
Who is he? or god, or Yaksha, or Gandharba may he be?'
Not one single word to utter, dared that fair-limbed maiden band;
All struck dumb before his beauty, in their bashful silence stood.
Smiling, first, upon the monarch, as on her he gently smiled,
Damayantí, in her wonder, to the hero Nala spake:—
'Who art thou of form so beauteous, thou that wakenest all my love?
Cam'st thou here like an immortal? I would know thee, sinless chief.
How hast entered in our palace? how hast entered all unseen?
Watchful are our chamber-wardens, stern the mandate of the king.'
By the maiden of Vidarbha Nala thus addressed, replied:—

Nala spake:

Know, O loveliest, I am Nala, here the messenger of gods,
Gods desirous to possess thee; one of these, the lord of heaven,

तेषाम् अन्यतमं देवं पतिं वरय शोभने ॥२३॥
तेषाम् एव प्रभावेन प्रविष्टोऽहम् अलक्षितः ।
प्रविशन्तं न मां कश्चिद् अपश्यन् नाप्यवारयत् ॥२४॥
एतदर्थम् अहं भद्रे प्रेषितः सुरसत्तमैः ।
एतच् छ्रुत्वा शुभे बुद्धिं प्रकुरुष्व यथेच्छसि ॥२५॥

॥ इति नलोपाख्याने तृतीयः सर्गः ॥३॥

बृहदश्व उवाच ।

सा नमस्कृत्य देवेभ्यः प्रहस्य नलम् अब्रवीत् ।
प्रणयस्व यथाश्रद्धं राजन् किं करवाणि ते ॥१॥
अहं चैव हि यच् चान्यन् ममास्ति वसु किञ्चन ।
तत् सर्वं तव विश्रब्धं कुरु प्रणयम् ईश्वर ॥२॥
हंसानां वचनं यत् तु तन् मां दहति पार्थिव ।
त्वत्कृते हि मया वीर राजानः सन्निपातिताः ॥३॥
यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद ।
विषम् अग्निं जलं रज्जुम् आस्थास्ये तव कारणात् ॥४॥
एवम् उक्तस् तु वैदर्भ्या नलस् तां प्रत्युवाच ह ।
तिष्ठत्सु लोकपालेषु कथं मानुषम् इच्छसि ॥५॥
येषाम् अहं लोककृताम् ईश्वराणां महात्मनां ।
न पादरजसा तुल्यो मनस् ते तेषु वर्ततां ॥६॥
विप्रियं ह्याचरन् मर्त्यो देवानां मृत्युम् ऋच्छति ।
त्राहि माम् अनवद्याङ्गि वरयस्व सुरोत्तमान् ॥७॥

Indra, Agni, Varun, Yama, choose thou, princess, for thy lord.
Through their power, their power almighty, I have entered here unseen;
As I entered in thy chamber none hath seen, and none might stay.
This, the object of my mission, fairest, from the highest gods,
Thou hast heard me, noble princess, even as thou wilt, decide.

End of Book III.

Vṛihadaśva spake:

To the gods performed her homage, smiled she, and to Nala spake:—
'Pledge to me thy faith, O Rája, how that faith may I requite?
I myself, and whatsoever in the world I have, is thine—
In full trust is thine—O grant me in thy turn thy love, O king!
'Tis the swan's enamouring language that hath kindled all my soul.
Only for thy sake, O hero, are the assembled Rájas met.
But if thou mine homage scornest, scornest me, all honoured king,
Poison for thy sake, fire, water, the vile noose will I endure.'
o, when spake Vidarbha's maiden, Nala answered thus, and said:—
With the world's dread guardians present wilt thou mortal husband choose?
Ve with them, the world's creators, with these mighty lords compared,
owlier than the dust they tread on, raise to them thy loftier mind.
Ian the gods displeasing, hastens to inevitable death—
air-limbed! from that fate preserve me, choose the all-excelling gods.

विरजांसि च वासांसि दिव्याश् चित्राः स्रजस् तथा ।
भूषणानि च मुख्यानि देवान् प्राप्य तु भुंक्ष्व वै ॥८॥
य इमां पृथिवीं कृत्स्नां सङ्क्षिप्य ग्रसते पुनः ।
हुताशम् ईशं देवानां का तं न वरयेत् पतिं ॥९॥
यस्य दण्डभयात् सर्वे भूतग्रामाः समागताः ।
धर्मम् एवानुरुध्यन्ति का तं न वरयेत् पतिं ॥१०॥
धर्मात्मानं महात्मानं दैत्यदानवमर्दनं ।
महेन्द्रं सर्वदेवानां का तं न वरयेत् पतिं ॥११॥
क्रियताम् अविशङ्केन मनसा यदि मन्यसे ।
वरुणं लोकपालानां सुहृद्वाक्यम् इदं शृणु ॥१२॥
नैषधेनैवमुक्ता सा दमयन्ती वचोऽब्रवीत् ।
समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा ॥१३॥
देवेभ्योऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते ।
वृणे त्वाम् एव भर्तारं सत्यम् एतद् ब्रवीमि ते ॥१४॥
ताम् उवाच ततो राजा वेपमानां कृताञ्जलिं ।
दौत्येनागत्य कल्याणि कथं स्वार्थम् इहोत्सहे ॥१५॥
कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः ।
परार्थे यत्नम् आरभ्य कथं स्वार्थम् इहोत्सहे ॥१६॥
एष धर्मो यदि स्वार्थो ममापि भविता ततः ।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयतां ॥१७॥
ततो वाष्पाकुलां वाचं दमयन्ती शुचिस्मिता ।
प्रत्याहरन्ती शनकैर् नलं राजानम् अब्रवीत् ॥१८॥
उपायोऽयं मया दृष्टो निरपायो नरेश्वर ।
येन दोषो न भविता तव राजन् कथञ्चन ॥१९॥
त्वञ्चैव हि नरश्रेष्ठ देवाश् चेन्द्रपुरोगमाः ।
आयान्तु सहिताः सर्वे मम यत्र स्वयंवरः ॥२०॥

Robes by earthly dust unsullied, crowns of amaranthine flowers,
Every bright celestial glory, wedded to the gods, enjoy.
He, who all the world compressing, with devouring might consumes,
Sovereign of the gods, Hutáśa, where is she who would not wed?
He, in awe of whose dread sceptre all the assembled hosts of men
Cultivate eternal justice, where is she who would not wed?
Him the all-righteous, lofty-minded, slayer of the infernal host,
Of all gods, the mighty monarch, who is she that would not wed?
Nor let trembling doubt arrest thee, in thy mind if thou couldst choose
Varuṇa, amongst earth's guardians; hear the language of a friend.'

To the sovereign of Nishadha Damayantí spake, and said,
And her eyes grew dim with moisture flowing from her inward grief:—
'To the gods, to all, my homage, king of earth, I humbly pay;
Yet thee only, thee, my husband, may I choose, Be this my vow!'
Answered he the trembling maiden, as with folded hands she stood,
'Bound upon this solemn mission, mine own cause how dare I urge?
Plighted by a sacred promise to the everlasting gods;
Thus engaged to plead for others, for myself I may not plead.
This my duty; yet hereafter come I, on my own behalf,
Then I'll plead mine own cause boldly, weigh it, beauteous, in thy thought.'
Damayantí smiled serenely, and with tear-impeded speech,
Uttered brokenly and slowly, thus to royal Nala spake:—
Yet I see a way of refuge, 'tis a blameless way, O king;
Whence no sin to thee, O Rája, may by any chance arise.
Thou, O noblest of all mortals, and the gods by Indra led,
Come and enter in together, where the Svayamvara meets;

ततोऽहं लोकपालानां सन्निधौ त्वां नरेश्वर।
वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति ॥२१॥
एवम् उक्तस्तु वैदर्भ्या नलो राजा विशाम्पते।
आजगाम पुनस् तत्र यत्र देवाः समागताः ॥२२॥
तम् अपश्यंस् तथायान्तं लोकपाला महेश्वराः।
दृष्ट्वा चैनं ततोऽपृच्छन् वृत्तान्तं सर्वम् एव तं ॥२३॥
कच्चिद् दृष्टा त्वया राजन् दमयन्ती शुचिस्मिता।
किम् अब्रवीच्च नः सर्वान् वद भूमिपतेऽनघ ॥२४॥

नल उवाच।

भवद्भिर् अहम् आदिष्टो दमयन्त्या निवेशनं।
प्रविष्टः सुमहाकक्षं दण्डिभिः स्थविरैर् वृतं ॥२५॥
प्रविशन्तञ्च मां तत्र न कश्चिद् दृष्टवान् नरः।
ऋते तां पार्थिवसुतां भवताम् एव तेजसा ॥२६॥
सख्यश्च चास्या मया दृष्टास् ताभिश्च चाप्युपलक्षितः।
विस्मिताश्चाभवन् सर्वा दृष्ट्वा मां विबुधेश्वराः ॥२७॥
वर्ण्यमानेषु च मया भवत्सु रुचिरानना।
माम् एव गतसङ्कल्पा वृणीते सा सुरोत्तमाः ॥२८॥
अब्रवीच्चैव मां बाला आयान्तु सहिताः सुराः।
त्वया सह नरव्याघ्र मम यत्र स्वयंवरः ॥२९॥
तेषाम् अहं सन्निधौ त्वां वरयिष्यामि नैषध।
एवं तव महाबाहो दोषो न भवितेति ह ॥३०॥
एतावद् एव त्रिबुधा यथावृत्तम् उदाहृतं।
मया शेषे प्रमाणं तु भवन्तस् त्रिदशेश्वराः ॥३१॥

॥ इति नलोपाख्याने चतुर्थः सर्गः ॥४॥

Then will I, before the presence of the guardians of the world,
Name thee, lord of men! my husband, nor to thee may blame accrue.'
By the maiden of Vidarbha, royal Nala thus addressed,
Back again returned, where waited eager, the expecting gods.
Him, the mighty lords, earth's guardians, ere he yet drew near, beheld,
Him they saw, and bade him instant all his tidings to unfold—
'Was she seen of thee, O monarch, Damayantí with soft smile?
Spake she of us all? what said she? tell, O blameless lord of earth.'

Nala spake:

To the bower of Damayantí, on your solemn mission sent,
Entered I the lofty portal, by the aged warders watched;
Mortal eye might not behold me, there as swift I entered in;
None save that fair Rája's daughter, through your all-prevailing power.
And her virgin handmaids saw I, and by them in turn was seen;
And they all in mute amazement gazed upon me as I stood.
I described your godlike presence, but the maid with beauteous face
Chooses me, bereft of reason, O most excellent of gods!
Thus she spake, that maiden princess, 'Let the gods together come,
Come with thee, O king of mortals, where the Svayamvara meets;
There will I, before their presence, choose thee, Rája, for my lord.
So to thee, O strong-armed warrior, may no blame, no fault ensue.'
Thus it was, even as I tell you word for word did it befall;
As for what remains, the judgment rests with you, of gods the chief!

End of Book IV.

बृहदश्व उवाच ।

अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।
आजुहाव महीपालान् भीमो राजा स्वयंवरे ॥१॥
तच् छ्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः ।
त्वरिताः समुपाजग्मुर् दमयन्तीम् अभीप्सवः ॥२॥
कनकस्तम्भरुचिरं तोरणेन विराजितं ।
विविशुस् ते नृपा रङ्गं महासिंहा इवाचलं ॥३॥
तत्रासनेषु विविधेष्वासीनाः पृथिवीक्षितः ।
सुरभिस्रग्धराः सर्वे प्रमृष्टमणिकुण्डलाः ॥४॥
तत्र स्म पीना दृश्यन्ते बाहवः परिघोपमाः ।
आकारवर्णसुश्लक्ष्णाः पञ्चशीर्षा इवोरगाः ॥५॥
सुकेशान्तानि चारूणि सुनासाक्षिभ्रुवाणि च ।
मुखानि राज्ञां शोभन्ते नक्षत्राणि यथा दिवि ॥६॥
तां राजसमितिं पुण्यां नागैर् भोगवतीम् इव ।
सम्पूर्णां पुरुषव्याघ्रैर् व्याघ्रैर् गिरिगुहाम् इव ॥७॥
दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।
मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥८॥
तस्या गात्रेषु पतिता तेषां दृष्टिर् महात्मनां ।
तत्र तत्रैव सक्ताभून् न चचाल च पश्यतां ॥९॥
ततः सङ्कीर्त्यमानेषु राज्ञां नामसु भारत ।
ददर्श भैमी पुरुषान् पञ्च तुल्याकृतीन् अथ ॥१०॥
तान् समीक्ष्य ततः सर्वान् निर्विशेषाकृतीन् स्थितान् ।
सन्देहाद् अथ वैदर्भी नाभ्यजानान् नलं नृपं ॥११॥

Vṛihadaśva spake:

Came the day of happy omen, moonday meet, and moment apt;
Bhímá to the Svayaṃvara summoned all the lords of earth.
One and all, upon the instant, rose th' enamoured lords of earth,
Suitors all to Damayantí in their loving haste they came.
They, the court with golden columns rich, and glittering portal arch,
Like the lions on the mountains entered they the hall of state.
There the lords of earth were seated, each upon his several throne;
All their fragrant garlands wearing, all with pendant ear-gems rich.
Arms were seen robust and vigorous as the ponderous battle mace,
Some like the five-headed serpents, delicate in shape and hue:
With bright locks profuse and flowing, fine-formed nose, and eye and brow,
Shone the faces of the Rájas like the radiant stars in heaven.
As with serpents, Bhogavatí, the wide hall was full of kings;
As the mountain-caves with tigers, with the tiger-warriors full.
Damayantí in her beauty entered on that stately scene,
With her dazzling light entrancing every eye and every soul.
O'er her lovely person gliding all the eyes of those proud kings;
There were fixed, there moveless rested, as they gazed upon the maid.
Then as they proclaimed the Rájas, (by his name was each proclaimed,)
In dismay saw Bhíma's daughter, five in garb, in form the same.
On those forms, all undistinguished each from each, she stood and gazed.
In her doubt Vidarbha's princess Nala's form might not discern,

यं यं हि ददृशे तेषां तं तं मेने नलं नृपं ।
